॥ श्रीः ॥

## ॥ श्रीचन्द्रमौलीश्वरवर्णमालास्तोत्रम् ॥

श्रीशात्मभूमुख्यसुरार्चिताङ्घ्रिं श्रीकण्ठशर्वादिपदाभिधेयम् ।
श्रीशङ्कराचार्यहृदब्जवासं श्रीचन्द्रमौलीशमहं नमामि ॥ १

चण्डाम्शुशीताम्शुकृशानुनेत्रं चण्डीशमुख्यप्रमथेड्यपादम् ।
षडास्यनागास्यसुशोभिपार्श्वं श्रीचन्द्रमौलीशमहं नमामि ॥ २

द्रव्यादिसृष्टिस्थितिनाशहेतुं रव्यादितेजांस्यपि भासयन्तम् ।
पव्यायुधादिस्तुतवैभवं तं श्रीचन्द्रमौलीशमहं नमामि ॥ ३

मौलीस्फुरज्जन्हुसुतासिताम्शुं व्यालेशसंवेष्टितपाणिपादम् ।
शूलादिनानायुधशोभमानं श्रीचन्द्रमौलीशमहं नमामि ॥ ४

लीलाविनिर्धूतकृतान्तदर्पं शैलात्मजासंरक्षितवामभागम् ।
शूलाग्रनिर्भिन्नसुरारिसङ्घं श्रीचन्द्रमौलीशमहं नमामि ॥ ५

शतैः श्रुतीनां परिगीयमानं यतैर्मुनीन्द्रैः परिसेव्यमानम् ।
नतैः सुरेन्द्रैरभिपूज्यमानं श्रीचन्द्रमौलीशमहं नमामि ॥ ६

मत्तेमभक्त्या परिशोभिताङ्गं चित्ते यतीनां सततं वसन्तम् ।
वित्तेशमुख्यैः परिवेष्टितं तं श्रीचन्द्रमौलीशमहं नमामि ॥ ७

हम्सोत्तमैः चेतसि चिन्त्यमानं संसारपाथोनिधिकर्णधारम् ।
तं सामगानप्रियमष्टमूर्तिं श्रीचन्द्रमौलीशमहं नमामि ॥ ८

नताघहं नित्यचिदेकरूपं सतां गतिं सत्यसुखस्वरूपम् ।
हतान्धकं हृद्यपराक्रमं तं श्रीचन्द्रमौलीशमहं नमामि ॥ ९

मायातिगं वीतभयं विनिद्रं मोहान्तकं मृत्युहरं महेशम् ।
फालानलं नीलगलं कृपालुं श्रीचन्द्रमौलीशमहंनमामि ॥ १०

मित्रं हि यस्याखिलशेवधीशः पुत्रश्च विघ्नौघविभेददक्षः ।
पात्रं कृपायाश्च समस्तलोकः श्रीचन्द्रमौलीशमहंनमामि ॥ ११

इति श्री भारतीतीर्थमहास्वामिविरचितं
श्रीचन्द्रमौलीश्वरवर्णमालास्तोत्रं सम्पूर्णम् ॥

